# Shivarajnishrikritam Purushottamasahasranama Stotram

# શિવરાજ્ઞીશ્રીકૃતં પુરુષોત્તમસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Shivarajnishrikritam Purushottamasahasranama Stotram

File name : shivarAjnIshrIkRRitaMpuruShottamasahasranAmastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, sahasranAma, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 38/24-288||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# શિવરાજ્ઞીશ્રીકૃતં પુરુષોત્તમસહસ્રનામસ્તોત્રમ્

શ્રીશિવરાજ્ઞીશ્રીરુવાચ ।
તૃપ્તાહં પૂર્વરૂપાણિ જ્ઞાત્વા કાન્તમુખાન્મમ ।
પ્રાણેશાય નમસ્તેઽસ્તુ પુરુરૂપાય શાર્ઙ્ગિણે ॥ ૨૪॥

રૌદ્રીરમણીનાથશ્રીધ્રુનારાયણ તે નમઃ ।
મૈરવીધૃતિયુઙ્મેરુનારાયણાય તે નમઃ ॥ ૨૫॥

સૌરીશાતનીયવિષ્ણુનારાયણાય તે નમઃ ।
ચાન્દ્રીકૌમુદીશદેવનારાયણાય તે નમઃ ॥ ૨૬॥

ભૂયસીદક્ષિણાશ્રીશયન્ત્રયણ તે નમઃ ।
વૈષ્ણવીશ્રીશ તે બ્રહ્મનારાયણ નમોઽસ્તુ ચ ॥ ૨૭॥

દેવવીથીશ્રીશ આદિત્યનરાયણ તે નમઃ ।
આનન્તીશ્રીશ તે ગરુત્મન્નારાયણ તે નમઃ ॥ ૨૮॥

આર્ષીપદ્મેશ તે આર્ષનારાયણાય તે નમઃ ।
જ્યોત્સ્નાશ્રીશ્વર તે પ્રાજ્ઞનારાયણ નમોઽસ્તુ તે ॥ ૨૯॥

શાર્દૂલિકાશ્રીશ વીરનારાયણાય તે નમઃ ।
સરોભદ્રાશ્રીશ ભદ્રનારાયણાય તે નમઃ ॥ ૩૦॥

સર્વભદ્રાશ્રીશ હરિનારાયણ નમોઽસ્તુ તે ।
સ્વતન્ત્રાશ્રીપતે બીજનારાયણ નમોઽસ્તુ તે ॥ ૩૧॥

જયાલક્ષ્મીપતે વરનારાયણ નમોઽસ્તુ તે ।
સુદર્શનીશ્રીશ સ્ત્રીપુન્નારાયણ નમોઽસ્તુ તે ॥ ૩૨॥

જલનારાયણીશ્રીશ જલન્નયણ તે નમઃ ।
સ્વધાજશ્રીશ તે શીલનારાયણ નમો નમઃ ॥ ૩૩॥

પુણ્ડરીકશ્રીશ વાર્ધિનારાયણ નમોઽસ્તુ તે ।

માક્ષિકીશ્રીશ તે ચતુર્મુખનારાયણ નમઃ ॥ ૩૪॥

કૃપાવતીશ્રીશ કૃપનારાયણ નમોઽસ્તુ તે ।
રત્નનારાયણીશ્રીશ તીર્થન્નયણ તે નમઃ ॥ ૩૫॥

ભક્તિશ્રીકાન્ત તે જીવનારાયણ નમો નમઃ ।
અર્ધશ્રીશ્વર તેઽર્ધશ્રીપતિનારાયણ નમઃ ॥ ૩૬॥

અર્ધોર્ધ્વશ્રીશ્વર તેઽર્ધપિતૃનારાયણ નમઃ ।
પિપ્પલશ્રીપતે પ્લક્ષનારાયણ ચ તે નમઃ ॥ ૩૭॥

પીઠિકાશ્રીશ તે શાલપુંસ્ત્વનારાયણ નમઃ ।
વટશ્રીકાન્ત તે શ્યામનારાયણ નમો નમઃ ॥ ૩૮॥

રાજરાજ્ઞીશ્રીશ રાજનારાયણ ચ તે નમઃ ।
નૈષ્ઠિકીશ્રીશ તે બ્રહ્મચારિન્નયણ તે નમઃ ॥ ૩૯॥

શિવનારાયણીશ્રીશ શિવન્નયણ તે નમઃ ।
સ્તનકીશ્રીપતે સ્વર્ણનારાયણ ચ તે નમઃ ॥ ૪૦॥

સ્વામિનીશ્રીપતે સ્વામિનારાયણ ચ તે નમઃ ।
નિર્વાણીશ્રીશ સાવનનારાયણ ચ તે નમઃ ॥ ૪૧॥

સાધ્વીનારાયણીશ તે સાધુનારાયણ નમઃ ।
કુમ્ભિકાશ્રીશ તે ભક્તનારાયણ નમો નમઃ ॥ ૪૨॥

મેધાવતીશ્રીશ તે ચ મેધાનારાયણ નમઃ ।
પાર્થિવીશ્રીશ તે વહ્નિનારાયણ નમો નમઃ ॥ ૪૩॥

રસનારાયણીશ્રીશ રસન્નયણ તે નમઃ ।
સુધાક્ષિણીશ્રીશ ચક્રનારાયણ નમોઽસ્તુ તે ॥ ૪૪॥

વિજયાશ્રીપતે સત્યનારાયણ ચ તે નમઃ ।
હિરણ્યાશ્રીપતે હિરણ્યનારાયણ તે નમઃ ॥ ૪૫॥

નૈષ્કિઞ્ચનીશ્રીશ નૈરઞ્જનિન્નયણ તે નમઃ ।
કલ્યાણીશ્રીપતે પુણ્યનારાયણ ચ તે નમઃ ॥ ૪૬॥

રૂક્મવતીશ્રીશ બૃહદ્બ્રહ્મનારાયણ નમઃ ।
સુવિદ્યાશ્રીપતે ગુરુનારાયણ ચ તે નમઃ ॥ ૪૭॥

આચાર્યાણીશ્રીશ આચાર્યનારાયણ તે નમઃ ।
વૈદ્યુતીશ્રીશ તે વિદ્યુન્નારાયણ નમો નમઃ ॥ ૪૮॥

માધવીશ્રીપતે મધુનારાયણ ચ તે નમઃ ।
ધેનુમતીશ્રીશ નાથનારાયણ નમોઽસ્તુ તે ॥ ૪૯॥

વિશ્વીશ્રીશ વિભુનારાયણ તે ચ નમો નમઃ ।
મુક્તિશ્રીશ તે મોક્ષનારાયણ નમો નમઃ ॥ ૫૦॥

શિવરાજ્ઞીશ્રીશ કૃષ્ણનારાયણાય તે નમઃ ।
લક્ષ્મીનાથશ્રીપતે તે કમલાકાન્ત તે નમઃ ॥ ૫૧॥

પદ્માપતે રમાકાન્ત નારાયણીશ તે નમઃ ।
ઇન્દિરાકાન્ત ચ હિરણ્મયીપ્રાણપતે નમ ॥ ૫૨॥

મહાલક્ષ્મીપતે કૃષ્ણાપતે ઈશ્વરીશ નમઃ ।
હરિણીકાન્ત પરમેશ્વરીપતે ચ તે નમઃ ॥ ૫૩॥

દ્રવ્યાપતે ચ પુરુષોત્તમીપતે ચ તે નમઃ ।
વૈષ્ણવીશ ચ સમ્પદ્રૂપાધીશ ચ તે નમઃ ॥ ૫૪॥

ભગવતીશ ચ હરિદાસીશ્વર ચ તે નમઃ ।
હરિપ્રિયેશ વૈકુણ્ઠિકેશ બ્રાહ્મીશ તે નમઃ ॥ ૫૫॥

સમૃદ્ધીશ્વર શાલગ્રામીકાન્ત ચ તે નમઃ ।
ધનત્રયોદશીકાન્ત ચક્રિણીનાથ તે નમઃ ॥ ૫૬॥

પદ્મિનીસ્વામિને બિન્દ્રીપતયે તે નમો નમઃ ।
અબ્ધિજેશાય ચ સ્વર્ણરૂપિણીકાન્ત તે નમઃ ॥ ૫૭॥

ગોશકૃદ્વાસિનીસ્વામિન્ બ્રહ્મહૃત્સ્થેશ તે નમઃ ।
ધનેશ્વરીશ્વર ઋતમ્ભરાય તે નમો નમઃ ॥ ૫૮॥

પ્લક્ષવાસેશ્વરીશાય માયેશાય ચ તે નમઃ ।
માતૃકેશ્વર ચાડમાયેશ્વર સતીશ તે નમઃ ॥ ૫૯॥

સ્વામિનીનાથ તે બ્રહ્મશક્તિકાન્ત ચ તે નમઃ ।
આત્માત્મિકેશાઽન્તરાત્મિકેશ રમેશ તે નમઃ ॥ ૬૦॥

સત્ત્વપ્રકર્ષિણીકાન્ત પઞ્ચલેશ ચ તે નમઃ ।
ચઞ્ચદ્રૂપેશ્વરશ્રીવત્સેશ ઐન્દ્રીશ તે નમઃ ॥ ૬૧॥

જયન્તીશ ચ તે મણ્ડલાત્મિકેશ્વર તે નમઃ ।
સર્વતોભદ્રિકાસ્વામિન્ પદ્મશિલેશ તે નમઃ ॥ ૬૨॥

આક્ષરીશ ચ પ્રજ્ઞેશ શ્રાઙ્ગારિકેશ તે નમઃ ।
ભાગ્યરૂપેશ સિદ્ધીશાઽવતારિણીપતે નમઃ ॥ ૬૩॥

શાન્તાનાથ પરેશાંઽશેશ્વર કલેશ તે નમઃ ।
વિભવીશ્વર ભૂમ્નીશ ધામિનીકાન્ત તે નમઃ ॥ ૬૪॥

અર્ચાસ્વામિન્ જનનીશ કારિણીવર તે નમઃ ।
દેવીશ્વરીશ્વરીશ્વર મુક્તાનિકાપતે નમઃ ॥ ૬૫॥

પ્રપોષિકેશ ચ પરબ્રહ્મપત્નીપતે નમઃ ।
અનાદિનીપતે મમ પતે વૃન્દાપતે નમઃ ॥ ૬૬॥

તુલસીકાન્ત તે ચાપિ ભાર્ગવીપતયે નમઃ ।
અનાદિશ્રીકૃષ્ણનારાયણપત્નીશ તે નમઃ ॥ ૬૭॥

અન્નાદિનીપતે વૈભવેશ્વરીશાય તે નમઃ ।
સમ્પત્તીશ ચ વાસુદેવીશ્વર ચ તે નમઃ ॥ ૬૮॥

કાષ્ર્ણીસ્વામિન્ હંસિકેશ માણિકીકાન્ત તે નમઃ ।
પદ્માવતીપતે રાધાપતે ગોપીપતે નમઃ ॥ ૬૯॥

પાર્ષદાનીપતે પદ્માલયાપતે ચ તે નમઃ ।
આજાનુબાહવીશાય યાન્ત્રિકીશાય તે નમઃ ॥ ૭૦॥

સૌરાષ્ટ્રીશાય તે ચાજનાભીશ્વરાય તે નમઃ ।
દેવિકાપતયે ષષ્ઠીમનસાપતયે નમઃ ॥ ૭૧॥

દીપાવલીસ્વામિને તે તલાજાપતયે નમઃ ।
કામધેનવીકાન્તાય આર્જન્તીસ્વામિને નમઃ ॥ ૭૨॥

ક્રોધનાસ્વામિને તે ચ ગહ્વરાસ્વામિને નમઃ ।
સૂચીકાન્તાય ચ વનદેવીશ્વરાય તે નમઃ ॥ ૭૩॥

દામનીસ્વામિને કઙ્કાતાલીનાથાય તે નમઃ ।
પિતૃકન્યાસ્વામિને તે દાસીશ્વરાય તે નમઃ ॥ ૭૪॥

રાસાતલીસ્વામિને તે વાસન્તીપતયે નમઃ ।

સાલમાલીશ્વર માતૃકેશ્વરાય ચ તે નમઃ ॥ ૭૫॥

સ્વાસ્તિકીનાથ નાગેશીશ્વરાય તે નમો નમઃ ।
શાવદીનીસ્વામિને તે ઐન્દ્રજાલીશ તે નમઃ ॥ ૭૬॥

સરસ્વતીસ્વામિને તે વિદ્યાકાન્તાય તે નમઃ ।
લક્ષ્મણીપતયે ભૂગર્ભીયાનાથાય તે નમઃ ॥ ૭૭॥

નાડિકાપતયે વૈશ્વાવાસવીપતયે નમઃ ।
જુમ્માસેમ્લીસ્વામિને તે સાન્તપનીશ તે નમઃ ॥ ૭૮॥

સૌરતીસ્વામિને મહાબાલેશ્વરીશ તે નમઃ ।
ઐલવીલાધીશ દાક્ષજવઙ્ગરીશ તે નમઃ ॥ ૭૯॥

ઔષ્ણાલયીનાથ પ્રાજાકીયેશ્વર નમોઽસ્તુ તે ।
પૈત્રીનાથાય તે સેવિકેશ્વરાય ચ તે નમઃ ॥ ૮૦॥

પ્રાચીનીપતયે નૃપીપતયે તે નમો નમઃ ।
પૈશઙ્ગીપતયે સાન્તારણીનાથાય તે નમઃ ॥ ૮૧॥

શૈબીશ્વરાય તે થાર્કૂટસ્થીશ્વરાય તે નમઃ ।
વૈરજારીસ્વામિને તે શાક્ત્યક્ષિણીશ તે નમઃ ॥ ૮૨॥

પિશાચિનીશ્વર કાલિમાશીનાથાય તે નમઃ ।
ઔરલકેતવીસ્વામિન્ ક્રાથકીશ ચ તે નમઃ ॥ ૮૩॥

પાર્થવીરાજિકેશાય ચૌષ્ટ્રાલીશાય તે નમઃ ।
હઙ્ગારીપતયે જયકાષ્ઠલીપતયે નમઃ ॥ ૮૪॥

તીરાણીપતયે ચાલ્વીનારીશાય ચ તે નમઃ ।
વાર્ધિકાપતયેઽનાથાનાથાય તે નમો નમઃ ॥ ૮૫॥

રાજપુત્રીશ્વર પ્રકીર્ણિકાકાન્તેશ તે નમઃ ।
આલ્પકેતવીકાન્તાય જયકાષ્ણીશ્વરાય ચ ॥ ૮૬॥

પારીશાનીસ્વામિને તે ચૈન્દુરાયીશ તે નમઃ ।
મૌદ્રાણ્ડીપતયે ગણ્ડાત્મજાનાથાય તે નમઃ ॥ ૮૭॥

લૈનોર્ણીસ્વામિને બાર્હચ્છરીશ્વરાય તે નમઃ ।
બાલલીનીસ્વામિને તે વારસૈંહીશ તે નમઃ ॥ ૮૮॥

રાયગામલિકાકાન્ત સ્તોકહોમીશ તે નમઃ ।
કૈનતાન્તવીનાથાય કાષ્ઠયાનીશ તે નમઃ ॥ ૮૯॥

કોલકીશાય ચ દૈનમાનીશાય ચ તે નમઃ ।
રાયકિન્નટિકાસ્વામિન્ રાયકોટીશ્વરીશ તે ॥ ૯૦॥

રાણજિતીસ્વામિને તે વાકક્ષિકેશ તે નમઃ ।
મારીશીપતયે બાલેશ્વરીશ્વરાય તે નમઃ ॥ ૯૧॥

લામ્બરીસ્વામિને રાયનવાર્કીપતયે નમઃ ।
હુણ્ડિશાસ્વામિને કૂપેશિકાધિપતયે નમઃ ॥ ૯૨॥

કાલીમાણ્ડીસ્વામિને તે જેલેશીપતયે નમઃ ।
પારાવારીસ્વામિને તે કોટિશ્વરીશ તે નમઃ ॥ ૯૩॥

સાતીશિકાસ્વામિને તે કાર્કશિનીશ તે નમઃ ।
આણ્ડજારીશ તે બાલ્યરાજસીપતયે નમઃ ॥ ૯૪॥

સૌમનિકાપતયે તે ગાવાક્ષીપતયે નમઃ ।
પારાઙ્વૃત્તીશ સુમણીશ્વરીનાથ ચ તે નમઃ ॥ ૯૫॥

ઐશાનપાનીપતયે રાયપાનીભૃતે નમઃ ।
મઙ્ગલાપતયેઽમૃતાપતયે તે નમો નમઃ ॥ ૯૬॥

પ્રેમાદિપતયે રાજ્ઞીપતયે તે નમો નમઃ ।
કૌબેરીપતયે ચાપિ માહેન્દ્રીપતયે નમઃ ॥ ૯૭॥

યમીશ્વરાય ચ નમો વાયવીશાય તે નમઃ ।
વૈશ્વકર્મીસ્વામિને તે વાર્ક્ષીનાથાય તે નમઃ ॥ ૯૮॥

રૌદ્રીશાય ચ તે વહ્નિપુત્રીશ્વરાય તે નમઃ ।
શ્રાવણીસ્વામિને તે ખાનિજીનાથાય વૈ નમઃ ॥ ૯૯॥

સાંવત્સરીસ્વામિને તે ગોપિકેશાય તે નમઃ ।
પ્રાચીનીપતયે તે ચ પિશઙ્ગીપતયે નમઃ ॥ ૧૦૦॥

રાશિયાનીસ્વામિને તે રોમાયનીશ તે નમઃ ।
પારશીપતયે તે ચ ધૈવરીપતયે નમઃ ॥ ૧૦૧॥

કિન્નરીસ્વામિનેઽમરીકાન્તાય તે નમો નમઃ ।
ગૌરીશાય પરીશાયાઽઽબ્રિક્તીશાય ચ તે નમઃ ॥ ૧૦૨॥

હારિતીશાય પાતાલીશ્વરાય તે નમો નમઃ ।
સ્વાર્ગિણીશાયાઽપ્સરઃકાન્તાય તે ચ નમો નમઃ ॥ ૧૦૩॥

બ્રહ્મસરઃપતયે તે ગાથિકાપતયે નમઃ ।
વિદ્યુન્મણિસ્વામિને તે કુશલેશાય તે નમઃ ॥ ૧૦૪॥

ભૌમીશ્વરાય ચ તુભ્યં દાનવીશાય તે નમઃ ।
શક્તિનાથાય ચ કશીરાજ્ઞીશાય નમો નમઃ ॥ ૧૦૫॥

ધેનુપાલીસ્વામિને તે સખીશ્વરાય તે નમઃ ।
રાજરાજેશ્વરીશાય લીલેશ્વરાય તે નમઃ ॥ ૧૦૬॥

વિભૂતીશાય ચ દિવ્યસિદ્ધીશ્વરાય તે નમઃ ।
અશનાપતયે વિશ્વાપતયે તે નમો નમઃ ॥ ૧૦૭॥

શ્રીધરાય ભગવતીસ્વામિને તે નમો નમઃ ।
મહામાયાધિપતયે પ્રકૃતીશાય તે નમઃ ॥ ૧૦૮॥

ન્યાસિનીપતયે સાધ્વીપતયે તે નમો નમઃ ।
પતિવ્રતાસ્વામિને તે દીક્ષાધિપતયે નમઃ ॥ ૧૦૯॥

પ્રપત્તિપતયે રાધેશાય પ્રિયાભૃતે નમઃ ।
વૈરાજીશાય ચ ભૂતીશ્વરાય તે નમો નમઃ ॥ ૧૧૦॥

સૃષ્ટીશાય વિનષ્ટીશાય પુષ્ટીશાય તે નમઃ ।
ગીતેશ્વરાય ઉપનિષદીશ્વરાય તે નમઃ ॥ ૧૧૧॥

શ્રુતીશ્વરાય ચ પરાવિદ્યેશ્વરાય તે નમઃ ।
ગાયત્રીશાય નમસ્તે શારદેશાય તે નમઃ ॥ ૧૧૨॥

શાબ્દીશાય નમસ્તુભ્યમેકાદશીશ તે નમઃ ।
દ્વાદશીશાય ચ નમો જયન્તીશાય તે નમઃ ॥ ૧૧૩॥

ભાવનેશાય ચ મુક્તીશાય તુભ્યં નમો નમઃ ।
સેવાનાથાય તે ચારાધનાકાન્તાય તે નમઃ ॥ ૧૧૪॥

ગઙ્ગાનાથાય ચ મોક્ષપુરીનાથાય તે નમઃ ।
સાઙ્ખ્યયોગિનીશ્વરાય નૈષ્ઠકીપતયે નમઃ ॥ ૧૧૫॥

ત્યાગિનીપતયે ચાર્યાધીશાય ચ તે નમઃ ।

યોગિનીપતયે વીતરાણીશાય તે નમઃ ॥ ૧૧૬॥

નાગવલ્લીસ્વામિને તે પૂગીશ્વરાય તે નમઃ ।
રતિનાથાય સુરભિસ્વામિને તે નમો નમઃ ॥ ૧૧૭॥

નિર્વૃત્તીશાય સન્ધ્યાઽધિપતયે તે નમો નમઃ ।
મોહિનીશાય ચ વિદ્યાધ્રીશાય તે નમો નમઃ ॥ ૧૧૮॥

કિમ્પુરુષીસ્વામિને તે કૃષીશ્વરાય તે નમઃ ।
આબીશ્વરાય ચ મૃદીશ્વરાય તે નમો નમઃ ॥ ૧૧૯॥

ભૂપતયે લલિતાસ્વામિને તે ચ નમો નમઃ ।
કુઙ્કુમવાપીશ સંહિતાનાથાય નમો નમઃ ॥ ૧૨૦॥

ગુર્વીશ્વરાય ચ મુદ્રિકેશ્વરાય ચ તે નમઃ ।
અરણીશાય ચ કાશીશ્વરાય તે નમો નમઃ ॥ ૧૨૧॥

તપસ્વિનીસ્વામિને તે સૈરન્ધ્રીશાય તે નમઃ ।
ધાત્રીશાય ચ નમો નાગરીશાય તે નમઃ ॥ ૧૨૨॥

પરિવ્રાજિકાકાન્તાયાઽઽર્યસૂરિણીશ્વરાય ચ ।
રમેશાય તથા રામેશાય તે ચ નમો નમઃ ॥ ૧૨૩॥

સ્તુતીશાયાઽઽરાર્તિકેશાય પૂજેશાય તે નમઃ ।
અમ્બિકેશાય ચ નભોવાણીશ્વરાય તે નમઃ ॥ ૧૨૪॥

બુદ્ધીશ્વરાય ચ સ્તનશ્રીશ્વરાય ચ તે નમઃ ।
પ્રતિમાશ્રીપતયેઽવ્યક્તેશાય ચ તે નમઃ ॥ ૧૨૫॥

રસાધિપતયે સુધાપતયે તે નમો નમઃ ।
પુણ્યાધિપતયે મિષ્ટાપતયે તે નમો નમઃ ॥ ૧૨૬॥

પાકિનીશાય ધાન્યાધિપતયે તે નમો નમઃ ।
આજ્ઞાનાથાય ચ મુમુક્ષાપતયે ચ તે નમઃ ॥ ૧૨૭॥

વિરજેશાય ચ ચન્દ્રકાલેશાય ચ તે નમઃ ।
સુશીલાપતયે કદમ્બમાલેશાય તે નમઃ ॥ ૧૨૮॥

પારિજાતાઽધિપતયે કાલિકાપતયે નમઃ ।
દુર્ગાનાથાય ચાધિપતયે તે નમો નમઃ ॥ ૧૨૯॥

નન્દિનીશાય ચ પટ્ટાઙ્ગનેશાય ચ તે નમઃ ।
સરયૂસ્વામિને સાત્ત્વતીશાય તે નમો નમઃ ॥ ૧૩૦॥

સાકેતાપતયે સુદક્ષિણાધિપતયે નમઃ ।
કરીષિણીસ્વામિને તે હરિણીપતયે નમઃ ॥ ૧૩૧॥

ધરણીસ્વામિને લીલાસ્વામિને તે નમો નમઃ ।
સત્યાનાથાય પાઞ્ચાલીપતયે તે નમો નમઃ ॥ ૧૩૨॥

પ્રદીપાપતયે ભાગિરથીકાન્તાય તે નમઃ ।
કનકાસ્વામિને ચૈરાવતીનાથાય તે નમઃ ॥ ૧૩૩॥

સરોજિનીસ્વામિને તે કાન્તાકાન્તાય તે નમઃ ।
ગોમતીપતયે રેવાસ્વામિને તે નમો નમઃ ॥ ૧૩૪॥

વિશાલાક્ષીસ્વામિને તે સ્વર્ણરેખેશ તે નમઃ ।
રેવતીસ્વામિને ઋક્સ્વામિને તે ચ નમો નમઃ ॥ ૧૩૫॥

વૈકુણ્ઠાપતયે બ્રહ્મસતીકાન્તાય તે નમઃ ।
ઈશાવાસ્યાસ્વામિને તે સ્મૃતિકાન્તાય તે નમઃ ॥ ૧૩૬॥

કન્યાકાન્તાય ચ ભદ્રાકાન્તાય તે નમો નમઃ ।
ઓજસ્વતીસ્વામિને તે સત્તાકાન્તાય તે નમઃ ॥ ૧૩૭॥

વિષ્ણુગર્ભાધિપતયે વૈરાજ્ઞીપતયે નમઃ ।
દેવીશ્વરાય ચ પ્રધાનાસ્વામિને નમો નમઃ ॥ ૧૩૮॥

વરણીપતયે ગોલોકીશ્વરાય તે નમઃ ।
બદરીશાય ચ શ્વેતાનાથાય તે નમો નમઃ ॥ ૧૩૯॥

પાવનીપતયે ચાડવ્યાકૃતિકાન્તાય તે નમઃ ।
ધાત્રીશાય ચ જ્યોત્સ્નાસ્વામિને તે નમો નમઃ ॥ ૧૪૦॥

વીર્યાકાન્તાય મહતીનાથાય તે નમો નમઃ ।
ઓષધિપતયેડજાપતયે તે ચ નમો નમઃ ॥ ૧૪૧॥

વિશ્વમ્ભરાસ્વામિને તે ચાન્નપૂર્ણાભૃતે નમઃ ।
વિભાવરીસ્વામિને તે દક્ષિણાપતયે નમઃ ॥ ૧૪૨॥

આહુતીશાય ચ સનાતનીશ્વરાય તે નમઃ ।
અઞ્જનીશાય ચ ગણ્ડકીશ્વરાય ચ તે નમઃ ॥ ૧૪૩॥

તે સીતેશાય શબરીપતયે પિઙ્ગલાભૃતે ।
પ્રેયસીપતયે ચાપિ શ્રેયસીપતયે નમઃ ॥ ૧૪૪॥

માલાવતીસ્વામિને તે દ્વારિકેશાય તે નમઃ ।
સિંહવતીસ્વામિને તે ત્રિસ્પૃશાસ્વામિને નમઃ ॥ ૧૪૫॥

પક્ષવર્ધિનીનાથાયોન્મિલનીસ્વામિને નમઃ ।
ઉત્પત્તિસ્વામિને મોક્ષદાકાન્તાય ચ તે નમઃ ॥ ૧૪૬॥

સફલાસ્વામિને પુત્રપ્રદાનાથાય તે નમઃ ।
ષટ્તિલાસ્વામિને જયાસ્વામિને તે નમો નમઃ ॥ ૧૪૭॥

વિજયાસ્વામિને ચામલકીનાથાય તે નમઃ ।
પાપમોચનીનાથાય કામદેશાય તે નમઃ ॥ ૧૪૮॥

વરુથિનીસ્વામિને તે મોહિનીસ્વામિને નમઃ ।
અપરાસ્વામિને તે ચ નિર્જલાસ્વામિને નમઃ ॥ ૧૪૯॥

યોગિનીસ્વામિને તે ચ શયનીસ્વામિને નમઃ ।
કામિકાસ્વામિને તે ચ પુત્રદાસ્વામિને નમઃ ॥ ૧૫૦॥

અજાનાથાય પદ્માનાથાયેન્દિરાભૃતે નમઃ ।
પાશાઙ્કુશાધિનાથાય રમાનાથાય તે નમઃ ॥ ૧૫૧॥

પ્રબોધિનીશ્વરાયાઽપિ કમલેશાય તે નમઃ ।
ધામદેશાય ચ કપિલેશાય તે નમો નમઃ ॥ ૧૫૨॥

શલભેશાય ચ ચન્દ્રભાગેશાય ચ તે નમઃ ।
કુમુદ્વતીસ્વામિને તે નિત્યાનાથાય તે નમઃ ॥ ૧૫૩॥

ચન્દ્રકાન્તાય પદ્માક્ષીસ્વામિને તે નમો નમઃ ।
કાન્તિમતીસ્વામિને તે હૃષીકેશાય તે નમઃ ॥ ૧૫૪॥

અપરાજિતાનાથાય પદ્માવતીશ તે નમઃ ।
સુનન્દાસ્વામિને ધીપતયે તે ચ નમો નમઃ ॥ ૧૫૫॥

નન્દાનાથાય ચ ત્રયીસ્વામિને તે નમો નમઃ ।
ક્ષેમઙ્કરીસ્વામિને તે સુન્દરીપતયે નમઃ ॥ ૧૫૬॥

સુભગાસ્વામિને સુલક્ષણાનાથાય તે નમઃ ।

કૂર્મીનાથાય ચ મત્સ્યીનાથાય તે નમો નમઃ ॥ ૧૫૭॥

અશ્વિનીસ્વામિને હંસીસ્વામિને તે નમો નમઃ ।
સૌભાગ્યસુન્દરીશાય કલ્કિનીસ્વામિને નમઃ ॥ ૧૫૮॥

દુઃખહાશ્રીસ્વામિને તે વઞ્જુલીસ્વામિને નમઃ ।
રાત્રીશ્વરાય નમોઽધવેશ્વરાય નમો નમઃ ॥ ૧૫૯॥

ક્ષીરોદતનયેશાય ઘણ્ટિકાપતયે નમઃ ।
નીરાજનાધિનાથાય ઘટિકાસ્વામિને નમઃ ॥ ૧૬૦॥

વસુમત્યધિનાથાય ઋતમ્ભરાભૃતે નમઃ ।
રાધ્યાસાપતયે દિવ્યારુણાનાથાય તે નમઃ ॥ ૧૬૧॥

વમ્રીનાથાય ચ જ્યોષ્ટ્રીનાથાય તે નમો નમઃ ।
સુદુઘાસ્વામિને કૈદારિકાનાથાય તે નમઃ ॥ ૧૬૨॥

જાલન્ધરીસ્વામિને તે શઙ્ખચૂડીભૃતે નમઃ ।
માલતીસ્વામિને બર્બરિકાનાથાય તે નમઃ ॥ ૧૬૩॥

વેદવતીસ્વામિને તે પદ્મિનીસ્વામિને નમઃ ।
વૃન્દાવનીસ્વામિને તે કંવતીસ્વામિને નમઃ ।
પીવરીસ્વામિને મરુપત્નીનાથાય તે નમઃ ॥ ૧૬૪॥

તીર્થવલ્લીસ્વામિને તે તીર્થશ્રીસ્વામિને નમઃ ।
તિલોત્તમાસ્વામિને તે રૂપવતીભૃતે નમઃ ॥ ૧૬૫॥

વેદમાતૃવરાયાઽપિ ગાયત્રીપતયે નમઃ ।
સરમેશાય ચ પૈપ્પલાદીશ્વરાય તે નમઃ ॥ ૧૬૬॥

ઉપલેશાય ધરણિજેશાય તે નમો નમઃ ।
ધરેશાય નમસ્તુભ્યં માટુલીશાય તે નમઃ ॥ ૧૬૭॥

પિઙ્ગલીશાય ચ મૃગીશાય તે ચ નમો નમઃ ।
ગૌરસ્વરૂપિણીશાય નીતીશ્વરાય તે નમઃ ॥ ૧૬૮॥

બુધ્ધીશ્વરાય ચ નમઃ સક્રિયેશાય તે નમઃ ।
તુષ્ટીશાય નમસ્તુભ્યં કામનેશાય તે નમઃ ॥ ૧૬૯॥

વેદિકેશાય ચ નમશ્ચાજ્યાહુતિભૃતે નમઃ ।
પત્નીશાલાધિપતયે ચિતિનાથાય તે નમઃ ॥ ૧૭૦॥

ઇધ્માનાથાય ચ નમ ઉદ્ગીતિપતયે નમઃ ।
ધૃતીશાય નમો વેલાસ્વામિને ચ નમો નમઃ ॥ ૧૭૧॥

ધૂમોર્ણાપતયે તે ચ કાષ્ઠાધીશાય તે નમઃ ।
વધૂનાથાય ચ લતાનાથાય તે નમો નમઃ ॥ ૧૭૨॥

નદીનાથાય ચ નમઃ પતાકાપતયે નમઃ ।
ભોગિનીપતયે નમો રસિકાપતયે નમઃ ॥ ૧૭૩॥

ચિદાનન્દીસ્વામિને તે મૃત્યુલક્ષ્મીભૃતે નમઃ ।
સુશ્રુતિપતયે વિજયન્તીશ્વરાય તે નમઃ ॥ ૧૭૪॥

સુકન્યાપતયે નમશ્ચાલસાપતયે નમઃ ।
શ્રીછાયાસ્વામિને ચિત્રલેખાનાથાય તે નમઃ ॥ ૧૭૫॥

નવરઙ્ગાધિપતયે કિંશુકીસ્વામિને નમઃ ।
કલ્પલતાધિનાથાય બકુલાપતયે નમઃ ॥ ૧૭૬॥

ચિત્રવતીસ્વામિને તે ચારુપદ્માભૃતે નમઃ ।
સુવર્ણમુખરીશાય માલાવતીભૃતે નમઃ ॥ ૧૭૭॥

વીરાધિપતયે પ્રભાવતીનાથાય તે નમઃ ।
શ્રીમતીસ્વામિને પણ્યાસ્વામિને તે નમો નમઃ ॥ ૧૭૮॥

નાગલક્ષ્મીસ્વામિને તે જ્યોતિષ્મતીભૃતે નમઃ ।
ઉદ્યોગિનીસ્વામિને તે પૂર્ણાનાથાય તે નમઃ ॥ ૧૭૯॥

સિદ્ધેશ્વરીસ્વામિને તે કૃતિકાન્તાય તે નમઃ ।
કવિતાસ્વામિને ગ્રન્થિવરાત્મને નમો નમઃ ॥ ૧૮૦॥

તાલિકાસ્વામિને ચાપિ સઙ્ગીતિસ્વામિને નમઃ ।
પ્રહારિણીપતયે તે માનિનીસ્વામિને નમઃ ॥ ૧૮૧॥

જરત્કાર્વીસ્વામિને તે સ્વસ્તિનાથાય તે નમઃ ।
ક્ષમાનાથાય ચ નમઃ પ્રતિષ્ઠાપતયે નમઃ ॥ ૧૮૨॥

લજ્જાનાથાય ચ નમઃ પિપાસાપતયે નમઃ ।
દાહિકાસ્વામિને શ્રદ્ધાસ્વામિને તે નમો નમઃ ॥ ૧૮૩॥

મૈથિલીયૂથનાથાય કૌશલાસ્વામિને નમઃ ।

નિકુઞ્જકાન્તાનાથાય શય્યાકાન્તાય તે નમઃ ॥ ૧૮૪॥

પુરન્ધ્રીકુલકાન્તાય કિરાતીસ્વામિને નમઃ ।
પુલિન્દીસ્વામિને સિંહલદ્વીપસ્ત્રીભૃતે નમઃ ॥ ૧૮૫॥

દૈશિકીસ્વામિને નમો વિદૈશિકીભૃતે નમઃ ।
ક્રતુકાનકીનાથાયાઽજિતપત્સ્ત્રીભૃતે નમઃ ॥ ૧૮૬॥

શ્રીલોકાદ્રિપ્રિયેશાય દેવતેશાય તે નમઃ ।
સામુદ્રિકાસ્વામિને તે પાર્થિવીસ્વામિને નમઃ ॥ ૧૮૭॥

ઉર્વશીવ્રાતનાથાય સુતલીસ્વામિને નમઃ ।
ત્રિવેણીપ્રાણનાથાય શબરીશાય તે નમઃ ॥ ૧૮૮॥

પમ્પાવરાય ચ રાજેશ્વરીશાય ચ તે નમઃ ।
લમ્બાનનાધિનાથાય ચાજામુખીશ્વરાય ચ ॥ ૧૮૯॥

કન્યાકુમારિકેશાય ગોપકન્યાભૃતે નમઃ ।
રૈવતીસ્વામિને નમો ગૌ લીસ્વામિને નમઃ ॥ ૧૯૦॥

જીવન્તીપતયે લાવણ્યવતીપતયે નમઃ ।
માલિનીપ્રાણનાથાય કુબ્જિકાસ્વામિને નમઃ ॥ ૧૯૧॥

યવનીસ્વામિને મૃગાવતીનાથાય તે નમઃ ।
કાન્તિમતીસ્વામિને તે જરદ્ગૌરીશ્વરાય ચ ॥ ૧૯૨॥

સુમિત્રાસ્વામિને સુતાનાથાય તે નમો નમઃ ।
વિન્ધ્યાવલીસ્વામિને તે પૌણ્યનૈધેયિકાભૃતે ॥ ૧૯૩॥

વર્ધિનીસ્વામિને વૈશ્વાવસવીશાય તે નમઃ ।
કુલાદેવીસ્વામિને તે રાસેશ્વરીભૃતે નમઃ ॥ ૧૯૪॥

રાજવતીસ્વામિને સીમન્તિનીશાય તે નમઃ ।
સામવતીસ્વામિને તે ચાનર્તીશારદાભૃતે ॥ ૧૯૫॥

મહાનન્દાસ્વામિને બન્દુલાનાથાય તે નમઃ ।
મનોરમાધિનાથાય શુચિષ્મતીભૃતે નમઃ ॥ ૧૯૬॥

અર્ચિષ્મતીસ્વામિને સુશીલાવિપ્રાભૃતે નમઃ ।
કલાવતીસ્વામિને તે લીલાવતીભૃતે નમઃ ॥ ૧૯૭॥

રત્નાવલીસ્વામિને તે શશિલેખાભૃતે નમઃ ।
અનઙ્ગલેખાપતયે ચિત્રલેખાભૃતે નમઃ ॥ ૧૯૮॥

દિવ્યાર્ષીસ્વામિને ચાપિ સુરસાસ્વામિને નમઃ ।
વર્ષાભ્વીસ્વામિને પારાવતીનાથાય તે નમઃ ॥ ૧૯૯॥

પ્રભાવતીસ્વામિને તે નર્મદાસ્વામિને નમઃ ।
રોહિણીશાય કુમુદાકાન્તાય તે નમો નમઃ ॥ ૨૦૦॥

પુરુહૂતાપતયે ચ શર્મવતીભૃતે નમઃ ।
સુધામ્નીસ્વામિને તે ચ માધવી સ્વામિને નમઃ ॥ ૨૦૧॥

કુન્દદન્તીસ્વામિને તે કદમ્બમાલિકાભૃતે ।
શાણ્ડિલીસ્વામિને મધુવિદ્યાભૃતે ચ તે નમઃ ॥ ૨૦૨॥

અશ્વમુખીસ્વામિને તે ગજમુખીશ્વરાય ચ ।
અમ્બેશ્વરાય ચ વૃદ્ધેશ્વરાય તે નમો નમઃ ॥ ૨૦૩॥

કુઙ્કુમવાપીનાથાય હિઙ્ગલાજીશ્વરાય ચ ।
કામાક્ષીસ્વામિને તે ચ મીનાક્ષીશાય તે નમઃ ॥ ૨૦૪॥

દમયન્તીસ્વામિને તે ભદ્રિકાસ્વામિને નમઃ ।
પ્રીતિકર્ણોત્પલેશાય દીર્ઘિકેશાય તે નમઃ ॥ ૨૦૫॥

ફલવતીસ્વામિને તે રમાનાથાય તે નમઃ ।
ગોભિલાસ્વામિને ગોપસુતાનાથાય તે નમઃ ॥ ૨૦૬॥

ઉદુમ્બુરીસ્વામિને તેઽષ્ટષષ્ટિસ્વામિને નમઃ ।
રત્નવતીસ્વામિને તે શુભાક્ષીસ્વામિને નમઃ ॥ ૨૦૭॥

દેવલીલાસ્વામિને તે દેવનદીશ્વરાય ચ ।
બહુચરાધિનાથાય હિઙ્ગુલાજાભૃતે નમઃ ॥ ૨૦૮॥

બ્રહ્મમોહિનીનાથાયાઽનુવૃત્તિસ્વામિને નમઃ ।
વિશાલાપતયે પરાવિદ્યાધિપતયે નમઃ ॥ ૨૦૯॥

દેવતાપતયે ચિત્યાકુતિસ્વામિન્નમોઽસ્તુ તે ।
પુરીનાથાય કમલેશ્વરીશાય નમો નમઃ ॥ ૨૧૦॥

પ્રાચીનાથાય ચ ઋષિતોયાનાથાય તે નમઃ ।
ગૌતમીશાય ચ વપુષ્મતીશાય ચ તે નમઃ ॥ ૨૧૧॥

મણિકર્ણાધિનાથાય શ્રીમાતૃસ્વામિને નમઃ ।
નમઃ પાર્થાધિપતયે માહિષ્મતીભૃતે નમઃ ॥ ૨૧૨॥

ભિલ્લિકાસ્વામિને તુભ્યં સૌરાષ્ટ્રીશીભૃતે નમઃ ।
વ્યાઘ્રીશાય નમસ્તુભ્યં ચિલ્લીનાથાય તે નમઃ ॥ ૨૧૩॥

તિથિનાથાયાભિચારિણીશ્વરાય ચ તે નમઃ ।
નિષાદીસ્વામિને વ્યાલીસ્વામિને તે નમો નમઃ ॥ ૨૧૪॥

ચતુર્ભુજાધિનાથાય હર્ષસિદ્ધિભૃતે નમઃ ।
સારિકાપતયે વિશ્વરૂપાનાથાય તે નમઃ ॥ ૨૧૫॥

શ‍ૃગાલીપતયે તે ચ મયૂરીશાય તે નમઃ ।
મઙ્ગલાસ્વામિને શૈલીકન્યકાસ્વામિને નમઃ ॥ ૨૧૬॥

નાલમેધીસ્વામિને તે ભક્તાનાથાય તે નમઃ ।
વિમલાસ્વામિને ચાપિ લમ્બિકાસ્વામિને નમઃ ॥ ૨૧૭॥

મરીચિકાધિનાથાય વેદીનાથાય તે નમઃ ।
ગુણ્ડિચાધિપ્રણાથાય ભક્તીશ્વરાય તે નમઃ ॥ ૨૧૮॥

રોહિણીશાય ચ કામદુઘેશાય ચ તે નમઃ ।
રતીશ્વરાય ચ પૃથ્વીશ્વરાય તે નમો નમઃ ॥ ૨૧૯॥

સંજ્ઞેશ્વરાય ચ દેવિકેશ્વરાય ચ તે નમઃ ।
વિભાવર્યધિનાથાય મૂર્તિકાન્તાય તે નમઃ ॥ ૨૨૦॥

રુક્મિણીસ્વામિને પ્રેમસખીકાન્તાય તે નમઃ ।
ગોદાવરીસ્વામિને તે કપિલાસ્વામિને નમઃ ॥ ૨૨૧॥

સ્વર્ણગૌરીસ્વામિને તે રમ્ભાનાથાય તે નમઃ ।
શીતલાસ્વામિને ચમ્પાસ્વામિને તે નમો નમઃ ॥ ૨૨૨॥

સાધ્યાનાથાય ધન્યાધિસ્વામિને તે નમો નમઃ ।
પુષ્પાકાન્તાય ચ કોકિલાકાન્તાય નમો નમઃ ॥ ૨૨૩॥

પૂર્ણિમાધિપતયે તે મઞ્જરીશાય તે નમઃ ।
ગાલવીશાય ચ યાજ્ઞસેનીશાય ચ તે નમઃ ॥ ૨૨૪॥

શ્રીમતીસ્વામિને લીલાવતીનાથાય તે નમઃ ।

કદલીસ્વામિને કાલિન્દીશ્વરાય ચ તે નમઃ ॥ ૨૨૫॥

હૈમીશ્વરાય ચ મહાવેદીશ્વરાય તે નમઃ ।
ખનીશ્વરાય ચ સનાતનીશ્વરાય તે નમઃ ॥ ૨૨૬॥

શ્યામાનાથાય ચ સર્વેશનીશાય ચ તે નમઃ ।
તપસ્વિનીસ્વામિને તે ગાથિકાસ્વામિને નમઃ ॥ ૨૨૭॥

કલ્પપુત્તલિકેશાય ઈશિકાસ્વામિને નમઃ ।
લાજાધિપતયે પ્રેઙ્ખાનાથાય તે નમો નમઃ ॥ ૨૨૮॥

નમઃ શ્રીમઙ્ગલાગૌરીસ્વામિને તે નમો નમઃ ।
ક્રોધનાપતયે તે ચ શ્રીવલ્લીસ્વામિને નમઃ ॥ ૨૨૯॥

વીરકન્યાધિપતયે રણચણ્ડીશ્વરાય ચ ।
ગરુત્મતીસ્વામિને તે ભીરુલક્ષ્મીશ તે નમઃ ॥ ૨૩૦॥

બાલાહકીસ્વામિને તે સુસહાસ્વામિને નમઃ ।
કિરણાસ્વામિને દ્યુતિસ્વામિને તે નમો નમઃ ॥ ૨૩૧॥

નૂત્નકુમારિકાસ્વામિનાથાય તે નમો નમઃ ।
શત્રુઞ્જયીસ્વામિને તે કાલલક્ષ્મીશ્વરાય ચ ॥ ૨૩૨॥

શ્રાવણીપતયે સાંવત્સરીકાન્તાય તે નમઃ ।
કાલકન્યાધિપતયે વહ્નિજાસ્વામિને નમઃ ॥ ૨૩૩॥

પ્રૈતીનાથાય પિત્રીસ્વામિને તે ચ નમો નમઃ ।
દર્વ્યાદિસ્વામિને રાશિકન્યાકાન્તાય તે નમઃ ॥ ૨૩૪॥

આનન્દિનીસ્વામિને તે મહાબ્રાહ્મીશ તે નમઃ ।
શાન્તિનાથાય ચ પરધામ્નીશાય ચ તે નમઃ ॥ ૨૩૫॥

પ્રધાનાપતયે ચાપિ પ્રાહ્લાદીપતયે નમઃ ।
વિભૂષાપતયે કલિકાદ્યાધિપતયે નમઃ ॥ ૨૩૬॥

દૈત્યાનિકાધિનાથાય સુનન્દિનીભૃતે નમઃ ।
ભોગિનીસ્વામિને મહાકાલીનાથાય તે નમઃ ॥ ૨૩૭॥

કેસરિપૃષ્ઠગાભૃતે તપતીસ્વામિને નમઃ ।
સૌદામ્નીપતયે હરિજિહ્વાધિપતયે નમઃ ॥ ૨૩૮॥

દૃષદ્વતીપ્રકાન્તાય કૃત્તિકાસ્વામિને નમઃ ।
કરઞ્જનિલયાનાથાત્મને તે ચ નમો નમઃ ॥ ૨૩૯॥

લોહિતાયનિકાનાથાત્મને તે ચ નમો નમઃ ।
નાટ્યનટીસ્વામિને તે નારીશ્વરાય તે નમઃ ॥ ૨૪૦॥

કથાનાથાય ચ સઞ્જીવનીનાથાય તે નમઃ ।
રાણિકાપતયેઽમરપુત્રિકાપતયે નમઃ ॥ ૨૪૧॥

ધન્યેશ્વરીસ્વામિને તે સતીશાસ્વામિને નમઃ ।
દેવાનિકીસ્વામિને તે કૃષ્ણિકાસ્વામિને નમઃ ॥ ૨૪૨॥

કુશાનાથાય તેઽનરણ્યસુતેશાય તે નમઃ ।
પરાનાથાય ચ હૃચ્છાયિનીનાથાય તે નમઃ ॥ ૨૪૩॥

પટ્ટકન્યાસ્વામિને તે કૃતમાલાભૃતે નમઃ ।
માઽજામ્બિકાધિનાથાય જલનારીભૃતે નમઃ ॥ ૨૪૪॥

વિદ્યાસ્નાતાસ્વામિને તે સુષુમ્ણાસ્વામિને નમઃ ।
ઇડાનાથાય ચ નમઃ પિઙ્ગલાપતયે નમઃ ॥ ૨૪૫॥

યશસ્વિનીસ્વામિને તે વિશ્વોદરાભૃતે નમઃ ।
પયસ્વિનીસ્વામિને તે તેજસ્વિનીભૃતે નમઃ ॥ ૨૪૬॥

નમઃ પુરીતત્પતયે ગાન્ધારીપતયે નમઃ ।
અરજાસ્વામિને ચિત્રાઙ્ગદાનાથાય તે નમઃ ॥ ૨૪૭॥

દૈત્યનારીપ્રાણાથાય શ્વેતાનાથાય તે નમઃ ।
રક્તાનાથાય ચ પીતાનાથાય તે નમો નમઃ ॥ ૨૪૮॥

નીલાનાથાય ચ નમો જયશ્રીપતયે નમઃ ।
સેવાદેવીશ્વરાયોર્ધ્વરેતસીપતયે નમઃ ॥ ૨૪૯॥

આરવીસ્વામિનેઽનાથાસ્વામિને તે નમો નમઃ ।
ગોપદેવીસ્વામિને તે મેરુકોટીશ્વરાય ચ ॥ ૨૫૦॥

કલ્પપાવટિકેશાય કુલપૂજ્યાભૃતે નમઃ ।
નમઃ કિશોરીસ્વામિને સુકૃતિસ્વામિને નમઃ ॥ ૨૫૧॥

રાથીતરીસ્વામિને ચ ધામકન્યાભૃતે નમઃ ।
ઋષિપત્નીસ્વામિને તે ત્યાગિનીસ્વામિને નમઃ ॥ ૨૫૨॥

મનુકન્યાધિપતયે ભક્તકન્યાભૃતે નમઃ ।
સુરાણીપતયે તે ચાઽસુરાણીપતયે નમઃ ॥ ૨૫૩ ॥

ધનાલસાધિપતયે ત્ર્યષ્ટકાર્વીભૃતે નમઃ ।
ઘુમતીપતયે તે ચ સાઙ્ખ્યસતીશ તે નમઃ ॥ ૨૫૪ ॥

શીલવતીસ્વામિને તે ભીમાશ્રીપતયે નમઃ ।
કૃષ્ણાનાથાય ચ તુઙ્ગભદ્રાનાથાય તે નમઃ ॥ ૨૫૫ ॥

ઐલવિલાધિનાથાય સહ્યદ્રિજીભૃતે નમઃ ।
દુગ્ધાનાથાય જીવન્તીસ્વામિને તે નમો નમઃ ॥ ૨૫૬ ॥

મહામારીસ્વામિને હ્રસ્વબદ્રીશ તે નમઃ ।
બ્રહ્મયોષિત્પતયે તે ધીનાથાય તે નમઃ ॥ ૨૫૭ ॥

સુનન્દાપતયે નમો લવિઙ્ગાસ્વામિને નમઃ ।
ચક્રવાકીસ્વામિને તે માર્જારીશાય તે નમઃ ॥ ૨૫૮ ॥

જાનકીપતયે કાઞ્ચનીગઙ્ગાપતયે નમઃ ।
ચન્દ્રાવતીસ્વામિને ચેરાવતીસ્વામિને નમઃ ॥ ૨૫૯ ॥

શાલાવતીસ્વામિને તે હરાઙ્ગિકાભૃતે નમઃ ।
મીનકઙ્ગ્વધિનાથાય બ્રહ્મપુત્રીભૃતે નમઃ ॥ ૨૬૦ ॥

શિક્ષાઙ્ગાપતયે નમો મૌક્તિકાપતયે નમઃ ।
પન્નામીપતયે મણિવર્ણાનાથાય તે નમઃ ॥ ૨૬૧ ॥

નારાયણીસ્વામિને તે મેનકાઙ્ગાભૃતે નમઃ ।
અઙ્ગશિવાઙ્ગિકાભૃતે લવહિતાભૃતે નમઃ ॥ ૨૬૨ ॥

લાટિશાપતયે નમઃ કાનિશાપતયે નમઃ ।
માપીઙ્ગાપતયે નમઃ સીક્યાઙ્ગાપતયે નમઃ ॥ ૨૬૩ ॥

અઙ્ગસ્વાઙ્ગાધિનાથાય તારિમાપતયે નમઃ ।
અઙ્ગહાસ્વામિને પર્ણવર્ણાનાથાય તે નમઃ ॥ ૨૬૪ ॥

મન્નામ્રિસ્વામિને દેવવર્ણાનાથાય તે નમઃ ।
રઙ્ગવર્ણાસ્વામિને તે શરભીપતયે નમઃ ॥ ૨૬૫ ॥

તરલિકાધિનાથાય કુમુદાસ્વામિને નમઃ ।

દેવવરૂથિનીશાય શૂરદેવીશ્વરાય ચ ॥ ૨૬૬॥

પિશાચીશતનાથાય દીક્ષિતાસ્વામિને નમઃ ।
ત્રિનેત્રિકાધિકાન્તાય ચોરુલાસ્વામિને નમઃ ॥ ૨૬૭॥

જગતીસ્વામિને પાટલિકાનાથાય તે નમઃ ।
ધ્વજાનાથાય ચ યોનિભૂતે તુભ્યં નમો નમઃ ॥ ૨૬૮॥

શિલાનાથાય ચ યશોવત્યાદિસ્વામિને નમઃ ।
મેખલાસ્વામિને ચાધિદેવતાસ્વામિને નમઃ ॥ ૨૬૯॥

પ્રોક્ષણીસ્વામિને તુરીદેવીનાથાય તે નમઃ ।
ભુવનેશીસ્વામિને તે ગઙ્ગાપુત્રીશ તે નમઃ ॥ ૨૭૦॥

વલ્ગુપ્રભૃતિનાથાય ચેન્દિરાસ્વામિને નમઃ ।
આમ્રજાન્યાદિનાથાય વામદેવીસુતાભૃતે ॥ ૨૭૧॥

અમરીસ્વામિને માસ્વામિને તુભ્યં નમો નમઃ ।
નિર્ગુણાપતયે સર્વાપતયે તે નમો નમઃ ॥ ૨૭૨॥

કાશ્યપીપતયે કુણ્ડલિનીનાથાય તે નમઃ ।
આપસ્તમ્બાદિપતયે નિજાકાન્તાય તે નમઃ ॥ ૨૭૩॥

મત્કુઞ્જેશાય ચ આમજનાયાઃ પતયે નમઃ ।
અકાન્તકાન્તાકાન્તાય મમ કાન્તાય તે નમઃ ॥ ૨૭૪॥

શ્રીરઙ્ગાયાઽશોકસુન્દરીશ્રીકાન્તાય તે નમઃ ।
દ્વાદશોત્તરસાહસ્રયુગલાત્માભિધાય તે ॥ ૨૭૫॥

વિશિષ્ટસ્વામિને સ્વીયાસ્વામિને તે નમો નમઃ ।
શિવરાજ્ઞીલક્ષ્મીશાય નારાયણીશાય નમઃ ॥ ૨૭૬॥

દયાજયારમાહૈમીમનૂર્જાલાડકીભૃતે ।
માલતીસુગુણાહંસીકસ્તૂરીપતયે નમઃ ॥ ૨૭૭॥

મુક્તાભુક્તાધિનાથાય રક્તારિક્તાભૃતે નમઃ ।
સ્મૃત્વા સર્વાણિ રૂપાણિ મદ્યુક્તાનિ પ્રભોસ્તવ ।
ભવામ્યતીવ મુદિતા યુગલાનિ સુખાનિ ચ ॥ ૨૭૮॥

અન્યાન્યપિ ત્વસઙ્ખ્યાનિ સ્મર્યન્તે કૃપયા તવ ।
અન્યાનન્દં સમાપ્નાસ્મિ ભૂયઃ કાન્તાય તે નમઃ ॥ ૨૭૯॥

અથાઽન્યાનિ ચરિત્રાણિ ભક્તાનાં ત્વદ્ગતાત્મનામ્ ।
મોક્ષાર્થાનિ વૃષાર્થાનિ શ્રોતુમિચ્છામિ તદ્રસા ॥ ૨૮૦॥

એતદ્ યુગલશ્રીકાન્તસ્તોત્રં નામસહસ્રકમ્ ।
દ્વાદશોત્તરનામાઢ્યં ચતુઃપુમર્થદં પરમ્ ॥ ૨૮૧॥

સૌભાગ્યદં વંશદં ચ લક્ષ્મીદં સમ્પદાં પ્રદમ્ ।
રાજ્યદં સ્વર્ગદં સર્વભોગ્યદં સ્વેષ્ટદં પરમ્ ॥ ૨૮૨॥

સિદ્ધિદં પુણ્યદં મૂર્તૌ સમાધિદં ચ પાવનમ્ ।
પાપહં મૃત્યુહં વિઘ્નનાશકં દુઃખનાશકમ્ ॥ ૨૮૩॥

દિવ્યભાવપ્રદં પરામુક્તિભૂપ્રાપકં શુભમ્ ।
અલભ્યદં તથાઽઽરોગ્યપ્રદં સ્મૃદ્ધિપ્રદં સદા ॥ ૨૮૪॥

પઠતાં શ◌ૃણ્વતાં સર્વનામાર્થસ્મરતાં તથા ।
નરનારીસમસ્તાનાં સર્વવાઞ્છાપ્રપૂરકમ્ ॥ ૨૮૫॥

સાક્ષાન્મન્મુખતો જાતં લક્ષ્મીજં શ્રીપ્રદં હરે ।
લક્ષ્મીરહં સ્તવરૂપા સ્તવપાત્રં ભવાન્ પતિઃ ॥ ૨૮૬॥

આવયોઃ સ્તાવકાનાં ચાવયોસ્તુલ્યત્વમસ્ત્વિતિ ।
અનાદિશ્રીકૃષ્ણનારાયણ નમોઽન્તરાત્મને ॥ ૨૮૭॥

સર્વાભ્યસ્તવ યોષાભ્યો નમો ભૂયો નમો નમઃ ।
વદ મેઽન્યચરિત્રાણિ ત્વયિ સ્નેહકરાણિ વૈ ॥ ૨૮૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૩૮-અધ્યાયાન્તર્ગતં શિવરાજ્ઞીશ્રીકૃતં દ્વાદશાધિક
પુરુષોત્તમસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૩૮/૨૪-૨૮૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 38/24-288..

Proofread by PSA Easwaran

*Shivarajnishrikritam Purushottamasahasranama Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*